Shiva Panchakshara Stotram

श्रीशिवपञ्चाक्षरस्तोत्रम्

SHLOKA · श्लोक

1

नागेन्द्रहाराय त्रिलोचनाय
भस्माङ्गरागाय महेश्वराय।
नित्याय शुद्धाय दिगम्बराय
तस्मै ‘न’ काराय नमः शिवाय॥

Nagendra haraya trilochanaya
Bhasmanga ragaya Maheshvaraya.
Nityaya shuddhaya digambaraya
Tasmai na karaya namah Shivaya.

2

मन्दाकिनीसलिलचन्दनचर्चिताय
नन्दीश्वरप्रमथनाथमहेश्वराय।
मन्दारपुष्पबहुपुष्पसुपूजिताय
तस्मै ‘म’ काराय नमः शिवाय॥

Mandakini salila chandana charchitaya
Nandishvara pramatha natha Maheshvaraya.
Mandara pushpa bahu pushpa supujitaya
Tasmai ma karaya namah Shivaya.

3

शिवाय गौरीवदनाब्जवृन्द-
सूर्याय दक्षाध्वरनाशकाय।
श्रीनीलकण्ठाय वृषध्वजाय
तस्मै ‘शि’ काराय नमः शिवाय॥

Shivaya Gauri vadanabja vrinda-
Suryaya Dakshadhvara nashakaya.
Shri Nilakanthaya vrisha dhvajaya
Tasmai shi karaya namah Shivaya.

4

वसिष्ठकुम्भोद्भवगौतमार्य-
मुनीन्द्रदेवार्चितशेखराय।
चन्द्रार्कवैश्वानरलोचनाय
तस्मै ‘व’ काराय नमः शिवाय॥

Vasishtha Kumbhodbhava Gautamarya-
Munindra devarchita shekharaya.
Chandrarka vaishvanara lochanaya
Tasmai va karaya namah Shivaya.

5 यक्षस्वरूपाय जटाधराय
पिनाकहस्ताय सनातनाय।
दिव्याय देवाय दिगम्बराय
तस्मै ‘य’ काराय नमः शिवाय॥

Yaksha svarupaya jata dharaya
Pinaka hastaya sanatanaya.
Divyaya devaya digambaraya
Tasmai ya karaya namah Shivaya.

PHALASHRUTI · फलश्रुति

6 पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ।
शिवलोकमवाप्नोति शिवेन सह मोदते॥

Panchaksharam idam punyam yah pathech chhiva sannidhau.
Shivalokam avapnoti Shivena saha modate.

Text checked against: Gita Press, Gorakhpur: Stotraratnavali (code 52), Sanskrit text with Hindi translation. Meanings, audio and all scripts at nityapaath.com/shiva-panchakshara-stotram/